# Gitamala by Vasishtha Ganapati Muni

# વસિષ્ઠગણપતિમુનિવિરચિતા ગીતમાલા

## Document Information

Text title : gItamAlA by vasiShThagaNapatimuni

File name : gItamAlAvasiShThagaNapatimuni.itx

Category : deities_misc, sanskritgeet

Location : doc_deities_misc

Proofread by : Paresh Panditrao

Description/comments : Songs agni, gaNapati, indra, vAyu, sUrya, dashAvatAra, ambikA, reNukA, guru, yogasAra

Latest update : March 31, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# વસિષ્ઠગણપતિમુનિવિરચિતા ગીતમાલા

## ૧. પ્રથમમ્ । અગ્નિગીતમ્ ॥

વાચમધિતિષ્ઠજ્જ્યોતિરપિ ભૌમમ્ ।
કિઞ્ચિદપિ દૈવં ગેયમવિરામમ્ ॥ ૧॥

સ ક્રતુષુ હોતા વિપ્રમુખવાસી ।
અત્તિ ચ સ હવ્યં વેદિતલભાસી ॥ ૨॥

પાવક વસુસ્ત્વં જ્વાલશતમાલી ।
કશ્ચિદસિ રુદ્રઃ શાસ્ત્રશતશાલી ॥ ૩॥

પાવક યદાસ્યે ભાસિ મનુજાનામ્ ।
તે તદિહ રાજ્યં બિભ્રતિ પશૂનામ્ ॥ ૪॥

અસ્મિ તવ દાસ્યે સઞ્ચર મદાસ્યે ।
સત્સદસિ મોહં યામિ ન યથાહમ્ ॥ ૫॥

નાસ્તિ શરણં મે કોઽપ્યવનિપૃષ્ઠે ।
અગ્નિમવનાર્થી દેવમુપતિષ્ઠે ॥ ૬॥

અસ્તિ કરમાલી કોઽપિ દિવિ રાજા ।
એષ નનુ કીલી ભાતિ ભુવિ રાજા ॥ ૭॥

આહ્વયતિ ભાનું પ્રાતરશનાય ।
ત્વામનલ યજ્વા સાયમશનાય ॥ ૮॥

એકમમૃતત્વાં પ્રાતરપિ સાયમ્ ।
શ્રોતુમયિ વાણીરાહ્વયતિ સોઽયમ્ ॥ ૯॥

દીપ્તતરકીલ ત્વં ભજસિ હવ્યમ્ ।
નેતરયિ વાચાં સ્તોત્રમપિ ભવ્યમ્ ॥ ૧૦॥

અસ્મિ ન સમર્થો યજ્ઞમયિ કર્તુમ્ ।

સ્તોત્રમવલમ્બે શર્મ તવ ભર્તુમ્ ॥ ૧૧॥

પાર્થિવવિભૂતિસ્ત્વં પચનકારી ।
વૈદ્યુતવિભૂતિર્વાક્પટલધારી ॥ ૧૨॥

ત્વં પચનકારી ભાસ્યુદરભાણ્ડે ।
વાક્પટલધારી દેવ કુલકુણ્ડે । ૧૩॥

ભાસ્યુદર ભાણ્ડે ભાસિ કુલકુણ્ડે ।
કિં ચ હૃદિ જીવો ભાસ્યનલ પિણ્ડે । ૧૪॥

સ્વસ્ય હૃદિ રૂપં ત્વામનલ લોકે ।
ભામિ વિમલોઽયં ધામ્નિ ગતભીકે ॥ ૧૫॥

ત્વાં તમહમર્થં યઃ સ્મરતિ નિત્યમ્ ।
પાવક વિશોકઃ પશ્યતિ સ સત્યમ્ ॥ ૧૬॥

યત્સ્ફુરણમન્તઃ સ્વસ્ય ધુતપાપમ્ ।
ધ્યેયમિદમગ્રે દેવ તવ રૂપમ્ ॥ ૧૭॥

દેવ ભવસિ ત્વં વહ્નિરિહ લોકે ।
સર્વદ સમન્તાદ્વિદ્યુદસિ નાકે । ૧૮॥

અત્ર જનની તે ભૂમિરતિપૂતા ।
દ્યૌરનલ દેવી તત્ર તવ માતા ॥ ૧૯॥

અત્ર વસવસ્તે વાયુસખ હસ્તે ।
વાચમનુભદ્રાસ્તત્ર તવ રુદ્રાઃ ॥ ૨૦॥

અત્ર હૃદિ રાજન્રાજસિ નરાણામ્ ।
તત્ર વરદાન્તઃ ખેલસિ સુરાણામ્ ॥ ૨૧॥

અત્ર જગદીશ ત્વં જ્વલનનામા ।
તત્ર મઘવા ત્વં નિઃસદૃશધામા ॥ ૨૨॥

દ્વાવનલશક્રૌ પામરજનાનામ્ ।
સ દ્વિતનુરેકઃ પણ્ડિતજનાનામ્ ॥ ૨૩॥

ભાનુરપિ દેવો લોક સુહૃદેષઃ ।
વ્યાપકકૃશાનો કોઽપિ તવ વેષઃ ॥ ૨૪॥

દેહિ ભગવન્મે સમ્પદમુદારામ્ ।
બુદ્ધિમપિ વહ્ને ત્રાતરતિધીરામ્ ॥ ૨૫॥

દેવ વરદાગ્ને ત્વં ભવ મમાસ્ત્રમ્ ।
બોધય ચ મહ્યં સર્વમપિ શાસ્ત્રમ્ ॥ ૨૬॥

સુપ્રભ ધિયા ત્વાં વ્યાપ્તમખિલાનિ ।
નૌમિ સકલાનિ ક્ષેમદ જયાનિ ॥ ૨૭॥

ગાણપતમગ્ને સર્વજનહૃદ્યમ્ ।
ભાતુ ભયહારિ ચ્છન્દ ઇદમાદ્યમ્ ॥ ૨૮॥

## ૨. દ્વિતીયમ્ । ગણપતિગીતમ્ ॥

ભદ્રતરમૂર્તિં ભદ્રતમકીર્તિમ્ ।
રુદ્રતનયં તં ગાયત મહાન્તમ્ ॥ ૧॥

જ્યોતિરિહ સૂક્ષ્મજ્વાલમતિદીપ્તમ્ ।
ભાતિ કુલકુણ્ડે યોગિમનુજાપ્તમ્ ॥ ૨॥

તન્નમત વાચો દૈવતમુદારમ્ ।
સઙ્કટશતાનાં યાતુમિહ પારમ્ ॥ ૩॥

તં ગણપતિં યો વિસ્મરતિ લોકે ।
સન્તતમભાગ્યો મજ્જતિ સ શોકે ॥ ૪॥

દમ્પતિવિહારઃ શીતશશિખણ્ડે ।
નન્દનનિવાસો દીપ્તકુલકુણ્ડે ॥ ૫॥

મિત્ર કુરુ ભક્તિં વિશ્વયુવરાજે ।
દેહિ હૃદમુષ્મૈ યોગિનુતિભાજે ॥ ૬॥

અત્ર સશરીરે મૂલશિખિરૂપી ।
યોગવિમુખો ના વિન્દતિ ન પાપી ॥ ૭॥

ધ્યાયતિ સદાન્તર્યોઽગ્રભુજમેતસ્ ।
તં ભજતિ દેવો સિદ્ધિરતિપૂતમ્ ॥ ૮॥

તસ્ય વરભાસા સન્દ્રવતિ શીર્ષમ્ ।
યસ્ય પરિતપ્તં વિન્દતિ સહર્ષમ્ ॥ ૯॥

યોગવિદ આહુઃ શીર્ષરસધારામ્ ।
સિદ્ધિશતહેતું તામમૃતસારામ્ ॥ ૧૦॥

પીઠમધિરૂઢં મૂલસરસીજમ્ ।
સર્વભુવનાનાં નૌમિ યુવરાજમ્ ॥ ૧૧॥

કાચન રુચિસ્તે ભર્ગસુત પૂતા ।
મઙ્ગલસુષુમ્નામાર્ગચરમાતા ॥ ૧૨॥

ભાગ્યમખિલાનાં દેવ તવ હસ્તે ।
ભૂરિ મહિમાનં વર્ણયતુ કસ્તે ॥ ૧૩॥

હસ્તિવદનો ના સત્વમધિદૈવમ્ ।
સઙ્કટહરાર્યૈઃ સઙ્ગદિતમેવમ્ ॥ ૧૪॥

ત્વત્પદસરોજે યસ્ય હૃદિ ભક્તિઃ ।
કાઽપિ શિવસૂનો તદ્વચસિ શક્તિઃ ॥ ૧૫॥

ત્વં ખલુ મઘોનો ધૂતસુજનાર્તિઃ ।
અત્ર ભુવિ કાચિત્કાર્યકરમૂર્તિઃ ॥ ૧૬॥

ત્વાં ભજતિ ગાઢપ્રીતિરતિશસ્તા ।
સિદ્ધિરિતિ લક્ષ્મીસ્તામરસહસ્તા ॥ ૧૭॥

સશ્રિયમુદારાં શ્રીહૃદયહારી ।
સંવિતરતાન્મે સર્વબલધારી ॥ ૧૮॥

શીતનગજાયાઃ સૂનુરતિહૃદ્યામ્ ।
ભૂરિકરુણો મે પૂરયતુ વિદ્યામ્ ॥ ૧૯॥

વારણમુખો મે વારયતુ કષ્ટમ્ ।
સર્વમપિ દેયાચ્છર્વસુત ઇષ્ટમ્ ॥ ૨૦॥

માં ચરણભાજં પાપહરનામા ।
પાલયતુ શમ્ભોઃ સૂનુરતિધામા ॥ ૨૧॥

નિર્જિતજરાધિં નિર્દલિતરોગમ્ ।
દન્તિવદનો મે વર્ધયતુ યોગમ્ ॥ ૨૨॥

સુક્ષ્મતમં મે કષ્ટહિમભાનો ।

પ્રાણબલમગ્ર્યં દેહિ હરસૂનો ॥ ૨૩॥

વાચિ મમ દિવ્યાં ધેહિ નિજધાટીમ્ ।
સિદ્ધિમજિતાસ્યૈ દેહિ વરચેટીમ્ ॥ ૨૪॥

હસ્તિમુખ યાચે ગાઢરસભક્ત્યા ।
આવિશ વિભો માં દિવ્યનિજશક્ત્યા ॥ ૨૫॥

દેહિ નિજતેજઃ કિઙ્કરજનાય ।
ઈશ્વર ગણાનાં ભારતહિતાય ॥ ૨૬॥

સર્વદ જનોઽયં વાઞ્છતિ ન મુક્તિમ્ ।
દેશકુશલાય પ્રાર્થયતિ શક્તિમ્ ॥ ૨૭॥

ગાણપતમેતદ્ગીતમતિશુદ્ધમ્ ।
ભાતુ ભયહારિ ચ્છન્દસિ નિબદ્ધમ્ ॥ ૨૮॥

## ૩. તૃતીયમ્ । ઇન્દ્રગીતમ્ ॥

ધર્તા સુકૃતાનાં હર્તા દુરિતાનામ્ ।
ભર્તા નભસો મે કર્તાસ્તુ શુભાનામ્ ॥ ૧॥

ખ્યાતાઽમિતવીર્યો ધૂતાખિલવૈરી ।
નેતા વિબુધાનાં ત્રાતા ભવતાન્મે ॥ ૨॥

વિક્રમ્ય વિધુન્વન્વક્રાન્ત્સમરેષુ ।
ચક્રાયુધમિત્રઃ શક્રઃ શરણં નઃ ॥ ૩॥

શક્રઃ શુભવિત્તાં લક્ષ્મીમનિયત્તાસ્ ।
આનન્દિતચિત્તાં મહ્યં ભુવિ ધત્તામ્ ॥ ૪॥

નાકં ત્વમરક્ષઃ પાકં યુધિ જિત્વા ।
વૃત્રં ચ વિધૂયામિત્રં પવિપાણે ॥ ૫॥

એતાનિ વિકુર્વન્ભૂતાનિ સ પાકઃ ।
શુભ્રે વિફલોઽભૂદભ્રે તવ જિષ્ણો ॥ ૬॥

પાકઃ પ્રભુરેવ પ્રાણાંશ્ચ વિકર્તુમ્ ।
યદમ્બરનાથ ત્વં ન પ્રતિકર્તુમ્ ॥ ૭॥

ન ત્વં યદિ રોદ્ધા વૃત્રઃ પરિભૂય ।
પ્રજ્ઞા-મયિ વિશ્વં દધ્યાત્તિમિરાય ॥ ૮॥

પ્રજ્ઞામુષસં તાં જ્ઞં ચાજિત સૂર્યમ્ ।
યદ્રક્ષાસિ વૃત્રાત્તત્તે સુરકાયમ્ ॥ ૯॥

સમ્મોહનશક્તિર્વૃત્રસ્ય તુ નિદ્રા ।
સમ્બોધનશક્તિર્વિદ્યુત્તવ ભદ્રા ॥ ૧૦॥

નાદાન્તવિભાસ્યં વેદાન્તરહસ્યમ્ ।
મોદાન્તરયોધં ભેદાન્તકમીડે ॥ ૧૧॥

ખે વાયુમનન્તં રુદ્રં નિનદન્તમ્ ।
ભાન્તં મઘવન્તં વન્દે ભગવન્તમ્ ॥ ૧૨॥

તારં મદનારિં પ્રાણં પવમાનમ્ ।
દેવં મઘવાનં ધ્યાયામ્યતિમાનમ્ ॥ ૧૩॥

વીર્યે સકલં ત્વદ્દેવેશ્વર નૂનમ્ ।
દેવાસુરમર્ત્યૈર્યુક્તં જગદૂનમ્ ॥ ૧૪॥

નિર્જિત્ય સમસ્તાન્ભાવાનપિ જિષ્ણો ।
સંરાડ્ ભુવનાનામાસીઃ પ્રભવિષ્ણો ॥ ૧૫॥

નાભેત્સ્ય ઇમં ચેદ્વૃત્રં દિવિ વીરમ ।
નામોક્ષ્યદધારે મેઘો ભુવિ નીરમ્ ॥ ૧૬॥

ગોપાયાસિ વિશ્વં શશ્વદ્બહુરીતીઃ ।
સ્વર્નાથ વિધુન્વન્વૃત્રસ્ય વિભૂતીઃ ॥ ૧૭॥

ચત્વારિ વપૂંષિ પ્રાહુર્મુનયસ્તે ।
યેષાં જગદેતદ્દેવાધિપ હસ્તે ॥ ૧૮॥

રૂપાણિ વિભો તે ભૂયાંસિ તતાનિ ।
દિઙ્ભાત્રતયાદ્યૈશ્ચત્વાર્યુદિતાનિ ॥ ૧૯॥

સર્વસ્ય ચ કર્તા સર્વસ્ય ચ ધર્તા ।
પ્રાણઃ પુરુહૂતઃ કો નામ સ ગીતઃ ॥ ૨૦॥

સૂત્રં વિદુરેકે સુશ્લોકમનન્તમ્ ।
કેચિદ્વિધિમાહુઃ કં તં ભગવન્તમ્ ॥ ૨૧॥

વિશ્વસ્ય નિદાનં વિશ્વાતિગમાનમ્ ।
એતં વિદુરન્યે વાયું પવમાનમ્ ॥ ૨૨॥

સર્વસ્ય ચ નેત્રી સર્વૈરપિ માન્યા ।
ગીર્વાણપતે તે કાલસ્તનુરન્યા ॥ ૨૩॥

રુદ્રં વિદુરેકે નેતર્બહુલીલમ્ ।
પ્રાહુર્યમમન્યે કાયં તવ કાલમ્ ॥ ૨૪॥

કાલોઽયમનાદિઃ સૂર્યાદપિ પૂર્વઃ ।
ભાક્તો જનિવાદસ્તસ્યાજર સર્વઃ ॥ ૨૫॥

સદ્વ્યાપકશક્તિં પ્રાણં કથયન્તિ ।
વ્યક્તેતરશબ્દં કાલં ગણયન્તિ ॥ ૨૬॥

વ્યક્તેતરશબ્દાન્નૈવ પ્રણવોઽન્યઃ ।
તસ્યેન્દ્ર તવાઙ્કે વિશ્રામ્યતિ ધન્યઃ ॥ ૨૭॥

સચ્છક્તિરભાણિ પ્રાણઃ પરમસ્ય ।
ચિચ્છક્તિરગાદિ પ્રાજ્ઞૈઃ પ્રણવોસ્ય ॥ ૨૮॥

સર્વત્ર વિસારિ જ્યોતિસ્તટિદાખ્યમ્ ।
દેવેન્દ્ર શરીરં ગીતં તવ મુખ્યમ્ ॥ ૨૯॥

પ્રાણં પ્રણવં ચ જ્યોતિશ્ચ વિસારિ ।
દૈવં નયદેકં વન્દે ભવધારિ ॥ ૩૦॥

એકઃ સ તિસૃણામસ્થૂલતનૂનામ્ ।
રાજત્યભિમાની રાજા ભુવનાનામ્ ॥ ૩૧॥

દૃશ્યસ્ય પરસ્તાદ્બ્રહ્માગુણમસ્તિ ।
ઇન્દ્રાભિધયા તત્ દૃશ્યેત્ર ચકાસ્તિ ॥ ૩૨॥

બન્ધુર્ભુવનાનાં સૂર્યસ્તતકીર્તિઃ ।
રાજન્નમરાણાં તુર્યા તવ મૂર્તિઃ ॥ ૩૩॥

દેવ પ્રતિબિમ્બીભૂય પ્રસિ સૂર્યમ્ ।
વિશ્વસ્ય મહેન્દ્ર ત્વં પશ્યતિ કાર્યમ્ ॥ ૩૪॥

નો કેવલમર્કે પિણ્ડેષુ ચ તાતઃ ।

અન્તઃ પ્રતિબિમ્બીભૂતઃ પુરુહૂતઃ ॥ ૩૫॥

પિણ્ડે પ્રતિબિમ્બીભૂતં પુરુહૂતમ્ ।
વૈશ્વાનરમાહુર્લોકત્રયતાતમ્ ॥ ૩૬॥

નાન્યાનિ કિલ ત્વદ્રૂપાણ્યખિલાનિ ।
માયિન્વિભવં તે કિં વા કથયામિ ॥ ૩૭॥

પાહિ ત્રિદશાનામીશાન કૃશાન્નઃ ।
ભૂયાત્તવ દેવ સ્તોતા બહુલાન્નઃ ॥ ૩૮॥

સર્વં ભવતાઽહં પક્ષેણ જયાનિ ।
ઈશો ભુવિ લોકે નાકેશ ભવાનિ ॥ ૩૯॥

આવિશ્ય વિભો માં કર્તું ભુવિ કાર્યમ્ ।
સમ્પ્રેષય કિઞ્ચિદ્દિવ્યં તવ વીર્યમ્ ॥ ૪૦॥

ધાતા ભુવનાનાં નેતા ત્રિદશાનામ્ ।
આવિશ્ય વિભુર્મામાભાતુ સુકર્મા ॥ ૪૧॥

ઇન્દ્રં પ્રભજન્તામેતાસ્તનુમધ્યાઃ ।
નાથં ગુણવત્યો યદ્વત્તનુમધ્યાઃ ॥ ૪૨॥

## ૪. ચતુર્થમ્ । વાયુગીતમ્ ॥

દિષ્ટાત્પતિતોઽહં મન્દે નરવૃન્દે ।
ત્રાણાય સમીરં તં સમ્પ્રતિ વન્દે । ૧॥

તારાસુમચિત્રં ખેલત્ખગજાલમ્ ।
ઉદ્યાનમિદં તે ખં વાત વિશાલમ્ ॥ ૨॥

દેવોઽસિ બલસ્ય પ્રાણોઽસ્યખિલસ્ય ।
બ્રૂયાદતિમાનં કસ્તે મહિમાનમ્ ॥ ૩॥

ભક્ત્યા તવ પુણ્યં તુલ્યં ક્વ નુ ગણ્યમ્ ।
તદ્ભક્તિ ચરિત્રં રૈક્વસ્ય પવિત્રમ્ ॥ ૪॥

મેયઃ સ ચ નાકઃ સ્વલ્પો નરલોકઃ ।
નિત્યાનિલ શુભ્રં નિઃસીમ તવાભ્રમ્ ॥ ૫॥

ઘુષ્યન્નસિ રુદ્રો દીપ્યન્નસિ શક્રઃ ।
પ્રાણન્નસિ વાતસ્ત્રેધાસિ નુતોઽતઃ ॥ ૬॥

સર્વાશ્ચ દિશસ્તે વ્યોમેશ્વર હસ્તે ।
ભાક્ત્તા પુનરેષા કોણેઽતિ ભાષા ॥ ૭॥

નિત્યાધ્વગ કર્તું શ્રાન્તે પરિહારમ્ ।
વાસિષ્ઠવચોઽમ્ભો હૃદ્યં પિબ ધીરમ્ ॥ ૮॥

અન્નાનિ કૃશાનૌ જુહ્વત્વદરિદ્રાઃ ।
વાયો જુહુમોઽમી વાચસ્ત્વયિ ભદ્રાઃ ॥ ૯॥

યદ્યપ્યયિ દિવ્યો ગુપ્તસ્તવ વેષઃ ।
વ્યોમેશ તથાઽપિ વ્યક્તસ્તવ ઘોષઃ ॥ ૧૦॥

આકાશગૃહાણામાત્માસિ સુરાણામ્ ।
વીર્યદ્રવિણાનાં કોશોઽસિ નરાણામ્ ॥ ૧૧॥

ત્વામાહ સરૈક્વઃ સંવર્ગમનન્તમ્ ।
સ્વસ્મિન્ત્સુદૃઢાનાં દુઃખાનિ હરન્તમ્ ॥ ૧૨॥

મૂલં તપસાં ત્વં દેવાસિ ઋષીણામ્ ।
લોકે સકલાનાં હેતુશ્ચ કૃષીણામ । ૧૩॥

દાનાર્થમસૂનાં પ્રાપ્તક્ષિતિરઙ્ગાઃ ।
એતે તવ વાતાઃ ખેશાન તરઙ્ગાઃ ॥ ૧૪॥

આત્મા મરુતાં ત્વં કૈરપ્યસિ ગીતઃ ।
કૈરપ્યધિરાજઃ કૈરપ્યયિ તાતઃ ॥ ૧૫॥

આત્મા મરુતાં ત્વં ગીતઃ પૃષદશ્વઃ ।
રાજા પુરુહૂતસ્તાતો નિગમાશ્વઃ ॥ ૧૬॥

વાતસ્તવ વીચિર્વિદ્યુત્તવ કાયમ્ ।
તારસ્તવ શબ્દો દેવાધિપ સોઽયમ્ ॥ ૧૭॥

વેદાદિમનાદિં તારં પ્રણવાખ્યમ્ ।
ધ્યાયન્તિ વિદો યે તૈઃ સ્યાત્તવ સખ્યમ્ ॥ ૧૮॥

વાતોઽસ્યધિભૂતં શક્રોઽસ્યધિવેદમ્ ।
રુદ્રોઽસ્યધિપિણ્ડં પક્ષાન્તરમેવમ્ ॥ ૧૯॥

ગીતાઃ કવિરાજા સર્વસ્તવભાજે ।
એતાસ્તનુમધ્યાસ્તાતાય ખરાજે ॥ ૨૦॥

## ૫. પઞ્ચમમ્ । સૂર્યગીતમ્ ॥

ભુવનત્રયપતિમૂર્ધજમધ્યે
દીપ્યન્મણિરયમહિમમયૂખઃ ।
ભુવનત્રયતોઽપ્યધિકો મૂલ્યે
ભવતાં સમ્પદમતુલાં ભણતુ ॥ ૧॥

એતન્મણ્ડલમતુહિનભાનો-
ર્ભાસાં સ્થાનં નિગમનિધાનમ્ ।
વિપ્રૈર્વન્દ્યં કાલે કાલે
વિશ્વપ્રાણાયતનં જયતિ ॥ ૨॥

શમ્ભોઃ કેશે વપુષા કેન
શ્રોત્રે માતુર્વપુષા કેન ।
રાજસિ નલિનીપ્રિય દમ્પત્યો-
ર્ભૂષણમસિ વા પર્યાયેણ ॥ ૩॥

કશ્ચન દક્ષિણનયનં ભર્તુ-
ર્મૂર્તિં કામપિ ભણતિ વિદન્યઃ ।
અપરો ભવનં ભુવનં ત્વિતરઃ
પ્રાણં દશશતકિરણ પરસ્ત્વામ્ ॥ ૪॥

પ્રાણિતિ ભવતા પશ્યતિ ભવતા
ખાદતિ પાતિ ચ ભુવનં ભવતા ।
ભાતિ ચ ભવતા ભાસ્કર ભવતો
માહાભાગ્યં ન ભણિતિ માર્ગે ॥ ૫॥

હૃદયં યદ્વજ્જીવાનાં નો
મણ્ડલમેતન્નાથસ્યૈવમ્ ।
તસ્માદેતત્પરિદૃષ્ટાન્તૈ-
ર્હૃદયસમષ્ટિઃ કથિતા શિષ્ટૈઃ ॥ ૬॥

મણ્ડલમધ્યે યત્તજ્જ્યોતિ-
    ર્હૃદયસ્યાન્તર્યત્તજ્જ્યોતિઃ ।
ભવતિ તદસ્મિન્નક્ષિણિ ગમ્યં
    રમ્યં પૂર્ણં મમ ખલુ કામ્યમ્ ॥ ૭॥

ક્ષેત્રે ક્ષેત્રે બહુશોઽન્વિષ્ટં
    લોચનમણ્ડલામધ્યે દૃષ્ટમ્ ।
કષ્ટં ગલિતં ફલિતં ચેષ્ટં
    પુનરસ્માકં કિં પરિશિષ્ટમ્ ॥ ૮॥

સાક્ષિણમક્ષિણિ નિશ્ચલદૃષ્ટ્યા
    નિર્મલનભસિ સ્થિતયા દ્વારા ।
લક્ષ્યં રાત્રાવપિ દિનનાથં
    પશ્યત નશ્યં મુઞ્ચત નિખિલમ્ ॥ ૯॥

નરકામાનામયમિહ રાજા
    જાગર્ત્યક્ષિણિ સાયં પાતા ।
સુરકામાનામીશાનોઽસૌ
    સૂર્યે ભાતિ પ્રાતઃ પાતા ॥ ૧૦॥

જ્ઞાનાકારં તેજઃ પશ્ય-
    ત્પ્રતિબિમ્બં વા પુંસો હૈમમ્ ।
ધીરો ધ્યાયન્નયનસ્થાને
    પાશૈર્મુક્તઃ કૃતકૃત્યઃ સ્યાત્ ॥ ૧૧॥

નિઃશેષાભિઃ સહિતં શ્રીભિ-
    ર્નિર્હતપાપે દહરસરોજે ।
કૃતિનઃ કિરણૈરઙ્ગુષ્ઠાભં
    તં લોકેરન્પુરુષમણિષ્ઠમ્ ॥ ૧૨॥

પરમવિદુસ્ત્વાં પાવકમવનૌ
    દિવિ રવિમમ્બરભુવને શક્રમ્ ।
આત્માનં વા જ્યોતિર્વૈકં
    જગતાં ભેદાત્કવયસ્ત્રેધા ॥ ૧૩॥

વૈભવશાલી દીધિતિમાલી
    પ્રશમિતપાપસ્ત્રિભુવનદીપઃ ।

દિવિ ભાતિ રવિર્યત્રાચરત-
    શ્ચરતશ્ચેશિતૃપરમં જ્યોતિઃ ॥ ૧૪॥

જયતિ વિવસ્વાન્દશશતધામા
    જયતિ ચ તસ્મિન્પરમં ધામ ।
પાદાકુલકૈર્નુતિરદસીયા
    ગણપતિમુનિના રચિતા જયતિ ॥ ૧૫॥

## ૬. ષષ્ઠમ્ । દશાવતારગીતમ્ ॥

વેદચોરમાશરં વિમથ્ય સોમકં પુરા-
    યુઃ સ્મૃતિં ધ્રુવાં પુનઃ સુતાય ભાસ્વતો દદૌ ।
સિન્ધુવારિ બન્ધુરાસ નૌધરસ્તપસ્વિનાં
    યશ્ચ તં સખે ભજસ્વ ઝાષવેષમચ્યુતમ્ ॥ ૧॥

મન્દરાદ્રિધારિણે મહેન્દ્રકાર્યકારિણે
    મૌનિચિત્તચારિણે મહોગ્રપાપહારિણે ।
અઞ્જલિં કુરુષ્વ ભોર્હરિલ્લતાન્તમઞ્જુલ
    સ્વચ્છકીર્તયે વિલાસકચ્છપાય વિષ્ણવે ॥ ૨॥

કાઞ્ચનાક્ષમુષ્ણરશ્મિજાલયા દૃશૈકયા
    ચ્યાવયન્તમોજસઃ પ્રદીપ્તઘોરતારયા ।
સાન્ત્વયન્તમન્યયા દયાર્દ્રયા વસુન્ધરાં
    શીતલત્વિષા હરિં કિરિચ્છલં સ્મરાન્તરે ॥ ૩॥

પ્રાણમુજ્જહાર દૈત્યવક્ષસો વિદારિતા
    ઘોનખૈરખર્વશક્તિપૌરુષોજ્વલન્નૃષા ।
આસુરાત્કુલાચ્છ્રિયં સુપર્વચેતસો ભિયં
    નારસિંહમૂર્તિરાર્તિમચ્યુતઃ સ હન્તુ તે ॥ ૪॥

ત્રીણિ યઃ પદાન્યજઃ સમન્તતો વિચક્રમે
    નાઙ્ગુલં યથાત્યરિચ્યતાત્ર દિવ્યમુત્ર વા ।
નાકચારિણોઽધિકર્તુમાશુ હર્તુમાસુરીં
    સમ્પદં ચ તં પરં પુમાંસમાશ્રયસ્વ રે ॥ ૫॥

યોઽર્જુનં ભુજાવલેન નિર્જિગાય દુર્જયં

ચેતસા વશંવદેન પર્યભૂદનન્યજમ્ ।
લોભમાસમુદ્રભૂમિદાનકર્મણાજય-
દ્રૈણુકેયભૂમિકઃ સ તે સ્યતાદ્ભિયં હરિઃ ॥ ૬॥

વાક્યકૃત્સુતઃ પિતુઃ પ્રભુશ્ચ રક્ષિતા વિશા-
મગ્રજોઽતિવત્સલો નિયામકોઽનુજન્મનામ્ ।
શ્રીકરઃ સતાં સખા દ્વિષાં ચ ભીકરો રિપુઃ
સીતયા કલત્રવાન્નરો હરિર્ધિનોતુ વઃ ॥ ૭॥

ભૂમિભારવારણાય યો યદુષ્વભૂદ્વિભુ-
ર્વિસ્મયં શિશોશ્ચ યસ્ય ચેષ્ટિતાનિ તેનિરે ।
શર્મ વઃ સ પૂરુષો રથાઙ્ગમાયુધં દધ-
ત્કર્મયોગદેશિકઃ કરોતુ પાર્થસારથિઃ ॥ ૮॥

ભારતં ન કેવલં ચતુઃસમુદ્રમુદ્રિતં
ભૂમિખણ્ડમેવ યોવ્યભૂષયન્નિજૈર્ગુણૈઃ ।
તસ્ય પૂરુષોત્તમસ્ય બુદ્ધનામધારિણઃ
પાવની કથા મુદે વિદાં નદીવ નાભસી ॥ ૯॥

ગાયત સ્તુતાદ્રિયધ્વમાશ્રયધ્વમુત્તમં
પૂરુષં પુરાણમર્કમણ્ડલાન્તરાલયમ્ ।
કલ્કભારવારણાય કલ્કિભૂમિકાધરો
યોઽયમસ્ય ભૂતલસ્ય રક્ષણાય ચેષ્ટતે ॥ ૧૦॥

## ૭. સપ્તમમ્ । અમ્બિકાગીતમ્ ॥

સેવકપાતકશમનં દૈવં
માનસવાઞ્છિતફલદં દૈવમ્ ।
સજ્જનરક્ષણચતુરં દૈવં
દુર્જનમર્દનપરુષં દેવમ્ ॥ ૧॥

ભાસ્કરબિમ્બે દીપ્તં દૈવં
લોચનમધ્યે સુપ્તં દૈવમ્ ।
સિતકરમણ્ડલગુપ્તં દૈવં
ત્રિગુણિતભુવનવ્યાપ્તં દૈવમ્ ॥ ૨॥

બહુશતચેટીસહિતં દૈવં
    રેણુસમષ્ટ્યા વિહિતં દૈવમ્ ।
અમ્બરસૌધે નિહિતં દૈવં
    ભૈરવવદનાભિહિતં દૈવમ્ ॥ ૩॥

અસુરુચિપદ્યાભૂતં દૈવં
    વસુરુદ્રાર્કૈર્ગીતં દૈવમ્ ।
ક્ષિતિજલશુચિષુ પ્રોતં દૈવં
    શિતમતિભિઃ સમધીતં દૈવમ્ ॥ ૪॥

મૃદુહૃદયાનાં સૌમ્યં દૈવં
    પ્રિયરૂપાણાં રમ્યં દૈવમ્ ।
તત્ત્વજ્ઞાનાં વિશ્વં દૈવં
    ગુણવિરુચીનાં શૂન્યં દૈવમ્ ॥ ૫॥

ચાલકમવનેઃ શક્ત્યા દૈવં
    શમ્પાદ્વારા દૃશ્યં દૈવમ્ ।
દોગ્ધ્રીમનુવરવાચ્યં દૈવં
    વિદધદ્વિનતમશોચ્યં દૈવમ્ ॥ ૬॥

શૈલે શૈલે વિહરદ્દૈવં
    વિપિને વિપિને વિચરદ્દૈવમ્ ।
ગ્રામે ગ્રામે ખ્યાતં દૈવં
    નગરે નગરે પ્રથિતં દૈવમ્ ॥ ૭॥

પરિતો યોન્નિ નિરાકૃતિ દૈવં
    સ્વર્ગે પૌલોમ્યાકૃતિ દૈવમ્ ।
હિમવતિ ગૌરીરૂપં દૈવં
    તનુષુ પ્રાણાકારં દૈવમ્ ॥ ૮॥

અર્ધં સુરગિરિધનુષો દૈવં
    ભુવનત્રિતયે પૂર્ણં દૈવમ્ ।
હૃદિ ભૂતાનાં કિઞ્ચિદ્દૈવં
    તૃણવન્મનસિ પ્રચુરં દૈવમ્ ॥ ૯॥

લજ્જાભાવો લલિતં દૈવં
    રસનાભાવો ભીમં દૈવમ્ ।

દૃષ્ટૌ દૃષ્ટૌ સૂક્ષ્મં દૈવં
    વિષયે વિષયે સ્થૂલં દૈવમ્ ॥ ૧૦॥

સ્તોત્રે સ્તોત્રે મધુરં દૈવં
    ધ્યાને ધ્યાને મદકૃદ્દૈવમ્ ।
નમને નમને વરદં દૈવં
    ચરિતે ચરિતે પૂતં દૈવમ્ ॥ ૧૧॥

આકાશામલગાત્રં દૈવં
    તારારવિશશિનેત્રં દૈવમ્ ।
વ્યાપકપવનશ્વસિતં દૈવં
    પારાવારસ્વેદં દૈવમ્ ॥ ૧૨॥

લીલાનારીવેષં દૈવં
    દિવ્યહિરણ્મયભૂષં દૈવમ્ ।
કેષાઞ્ચિત્કૃતપોષં દૈવં
    કેષાઞ્ચિત્કૃતશોષં દૈવમ્ ॥ ૧૩॥

પોષવિધાને શીતં દૈવં
    શોષવિધાને તપનં દૈવમ્ ।
સર્ગવિધાને વિકસદ્દૈવં
    પ્રલયવિધાને મીલદ્દૈવમ્ ॥ ૧૪॥

સોમં પીત્વા પુષ્ટં દૈવં
    દ્વિષતો હત્વા હૃષ્ટં દૈવમ્ ।
ભુવનપ્રલયે શિષ્ટં દૈવં
    સર્વપદાર્થોત્કૃષ્ટં દૈવમ્ ॥ ૧૫॥

કૌલાચારિષુ માદ્યદ્દૈવં
    સમયાચારિષુ શાન્તં દૈવમ્ ।
યોગાચારિષુ પીનં દૈવં
    જ્ઞાનાચારિષુ લીનં દૈવમ્ ॥ ૧૬॥

કામવિરોધિ કલત્રં દૈવં
    ગણપષડાનનપુત્રં દૈવમ્ ।
પાપવિદારિ પવિત્રં દૈવં
    જયતિ મુનિસ્તુતિપાત્રં દૈવમ્ ॥ ૧૭॥

# ૮. અષ્ટમમ્ । રેણુકાગીતમ્ ॥

સુરશિરશ્વરચ્ચરણરેણુકા ।
જગદધીશ્વરી જયતિ રેણુકા ॥ ૧॥

દેવતાશિરોદેશલાલિતમ્ ।
રેણુકાપદં દિશતુ મે મુદમ્ ॥ ૨॥

કુણ્ડલીપુરીમણ્ડનં મહઃ ।
કિમપિ ભાસતાં મમ સદા હૃદિ ॥ ૩॥

મસ્તકૈતવં વસ્તુ શાશ્વતમ્ ।
અસ્તિ મે સદા શસ્તદં હૃદિ ॥ ૪॥

આદિનારિ તે પાદપઙ્કજમ્ ।
સ્ફુરતુ મે મનઃ સરસિજે સદા ॥ ૫॥

કેવલં પદોઃ સેવકોઽસ્મિ તે ।
વેદ્મિ નેતરદ્વેદસન્નુતે ॥ ૬॥

હૃદય તેણુનઃ સમુચિતોઽણુના ।
પરિચયોઽમ્બિકાપાદરેણુના ॥ ૭॥

પાહિ મુઞ્ચ વા પાદપઙ્કજમ્ ।
ત્રિદશસન્નુતે ન ત્યજામિ તે ॥ ૮॥

ચરણમમ્બ તે યો નિષેવતે ।
પુનરયં કુચૌ ધયતિ કિં કૃતી ॥ ૯॥

અહરહોઽમ્બ તે રહસિ ચિન્તયા ।
ધન્યતાં ગતો નાન્યદર્થયે ॥ ૧૦॥

સ્મરજિતો યથા શિરસિ જાહ્નવી ।
જનનિ રેણુકે મનસિ તે કૃપા ॥ ૧૧॥

અમ્બ પાહિ માં દમ્ભતાપસિ ।
પાદકઞ્જયોરાદિકિઙ્કરમ્ ॥ ૧૨॥

પુત્રમાત્મનઃ પુણ્યકીર્તને ।

બહુકૃપે કુતો મામુપેક્ષસે ॥ ૧૩॥

અમ્બ સંસ્તુતે જમ્ભવૈરિણા ।
પાહિ મામિમં મગ્નમાપદિ ॥ ૧૪॥

તત્ત્વવાદિનઃ સત્વશાલિનિ ।
ત્વામજે વિદુઃ સત્સ્વરૂપિણીમ્ ॥ ૧૫॥

ત્વાં પ્રચક્ષતે સદયવીક્ષિતે ।
વેદવેદિનો મોદરૂપિણીમ્ ॥ ૧૬॥

સંવિદં વિદુસ્ત્વામિદં પ્રસુ ।
પરમયોગિનઃ પરમદેવતે ॥ ૧૭॥

જનનિ કુણ્ડલીપુરનિવાસિનિ ।
પરશુરામવત્પશ્ય મામિમમ્ ॥ ૧૮॥

તનયરોદનં શ્રવણશાલિનિ ।
શૃણુ સુરાર્ચિતે યદિ દયા હૃદિ । ૧૯॥

યાચકઃ સુતો ભજનમીપ્સિતમ્ ।
તદપિ દુર્લભં કિમિદમમ્બિકે ॥ ૨૦॥

માસ્તુ વેતનં છિન્નમસ્તકે ।
ભજનમેવ તે યાચ્યતે મયા ॥ ૨૧॥

તરલતારયા જલજદીર્ઘયા ।
સાનુકમ્પયા શીતપાતયા ॥ ૨૨॥

કેવલં દૃશા પશ્ય રેણુકે ।
તેન મે શુભં ન ચ તવાશુભમ્ ॥ ૨૩॥

કિઙ્કરીભવત્સુરવિલાસિની ।
જયતિ કુણ્ડલીનગરવાસિની ॥ ૨૪॥

મધુરમમ્બ તે ચરણપઙ્કજમ્ ।
તત્ર યદ્રતૈ સ્ત્યજ્યતેઽખિલમ્ ॥ ૨૫॥

ચરણમમ્બ તે ચરતુ મે હૃદિ ।
ઇયમનામયે પ્રાર્થના મમ ॥ ૨૬॥

ભુજગકઙ્કણપ્રભૃતિ સંસ્તુતે ।
ભુજભુવામરેર્જનનિ પાહિ મામ્ ॥ ૨૭॥

કુણ્ડલીપુરીમણ્ડનાયિતા ।
ગણપતિસ્તુતા જયતિ રેણુકા ॥ ૨૮॥

## ૯. નવમમ્ । ગુરુગીતમ્ ॥

અવ્યક્તાદ્યત એતદ્વ્યક્તં જાતમશેષમ્ ।
યદ્ધત્તે તદજસ્રં યત્રાન્તે લયમેતિ ॥ ૧॥

આધારે ખલુ યસ્મિન્ગોલાનાં સહ લક્ષૈઃ ।
બ્રહ્માણ્ડં પ્રતિતિષ્ઠત્યેતન્નિસ્તુલસત્વે ॥ ૨॥

સૂર્યાદિગ્રહભાસાં યન્મૂલં ઘનતેજઃ ।
યદ્બ્રહ્માદિસુરાણાં શક્ત્યૈ શક્તિરુતાહો ॥ ૩॥

જ્ઞાત્વા તત્ત્વમસઙ્ગા ભાસા યસ્ય રમન્તે ।
યજ્જાલેન સમસ્તે દ્વૈતેક્ષાલ્પમતીનામ્ ॥ ૪॥

યદ્ધ્યાનેન ભવન્તિ સ્વાત્માનન્દનિમગ્નાઃ ।
યન્નિષ્ઠા ખલુ મુક્તિર્યચ્છન્દોઽપિ તદર્થઃ ॥ ૫॥

તદ્બ્રહ્મ પ્રણવાખ્યં ચિત્તે ધ્યાનકૃતે મે ।
અશ્રાન્તં રમણાખ્યાં બિભ્રદ્ભાતુમદિષ્ટામ્ ॥ ૬॥

આધારે ધૃતમૂલં હાર્દાબ્જે કૃતવાસમ્ ।
શીર્ષાબ્જાય વહદ્યત્પશ્ચાદિન્દ્રિયશક્ત્યૈ ॥ ૭॥

દૃષ્ટયાં તત્ર પરાચ્યાં યદ્દેહભ્રમકારિ ।
આવૃત્તં તુ પુનર્યત્સ્વાત્મૈક્યાનુભવાય ॥ ૮॥

પશ્યદ્વા વિષયૌઘં વિશ્રાન્તં યદુતાહો ।
મુક્ત્યૈ સંસ્થિતમન્તર્વૃત્ત્યૈક્યાનુભવેન ॥ ૯॥

આત્મજ્યોતિરિદં મે બિભ્રાણં રમણાખ્યામ્ ।
અશ્રાન્તં સ્ફુરતાત્તચ્છુદ્ધં હાર્દસરોજે ॥ ૧૦॥

યદ્દીપાદ્રમણાખ્યાદ્વ્યાપ્તં ગાણપતીષુ ।
વાણીભિત્તિષુ ધત્તે ગીતાચિત્રવિલાસમ્ ॥ ૧૧॥

યદ્ઘ્નન્તિ ચ્છવિજાલૈરજ્ઞાનાં તિમિરાણિ ।
તત્તત્ત્વં સ્ફુરતાદ્ધસ્તારધ્યાનસમાધૌ ॥ ૧૨॥

યાતાયાતવિહારૈરાધારેષુ ચ શીર્ષે ।
સઞ્ચારં વિદધાનં કિઞ્ચાશેષવિસારિ ॥ ૧૩॥

આલમ્બેન વિહીનં વ્યોમાભં પરિપૂર્ણમ્ ।
નિઃશબ્દં ગુરુરૂપં તદ્બ્રહ્મ સ્ફુરતાન્મે ॥ ૧૪॥

જ્ઞાનં ભાતિ પરોક્ષં યત્તત્ત્વશ્રવણેન ।
યત્સાઙ્ગત્યવિશેષો હેતુઃ સ્યાદપરોક્ષે । ૧૫॥

યચ્ચિન્તા સ્થિરમુક્ત્યૈ બ્રહ્મૈતદ્રમણાખ્યમ્ ।
મામાવૃત્ય સમન્તાદાનન્દે નિદધાતુ ॥ ૧૬॥

તારાનન્દનિયુક્તઃ પ્રીત્યા તસ્ય મતેન ।
આધાદ્દીપ્તગભીરં વાસિષ્ઠો ગુરુગીતમ્ ॥ ૧૭॥

## ૧૦. દશમમ્ । યોગસારગીતમ્ ॥

નિશિતયા ધિયા હૃદિ નિભાલનમ્ ।
ભુવનભૂપતેર્ભવનશોધનમ્ ॥ ૧॥

દહરમજ્જનં વિદધતં જનમ્ ।
બહુલસમ્મદં નયતિ ધીઃ પદમ્ ॥ ૨॥

અહમિતિ સ્મૃતેર્વ્રજ જનિસ્થલમ્ ।
ભવકથાનકં ગલતિ તેઽખિલમ્ ॥ ૩॥

નિજવિલોકિતં યદિ નિભાલ્યતે ।
વિષયસઙ્ગિતા ક્વનુ વિભાવ્યતે ॥ ૪॥

નયનદૃશ્યયોર્ગગનમન્તરમ્ ।
સમવલોકયન્ભજ વિભું પરમ્ ॥ ૫॥

વિષયવર્જનાદ્વિષયિણિ સ્થિરે ।
સકલસિદ્ધયો યતધિયઃ કરે ॥ ૬॥

રસનનીરગે મનસિ સન્તતમ્ ।

કરગતં સુખં ભવતિ નિશ્ચિતમ્ ॥ ૭॥

ગમય મસ્તકાત્કુલગૃહાનલમ્ ।
અવતરન્નિવ સ્મૃતિમિદં ત્વલમ્ ॥ ૮॥

સ્મરણસર્પિષા કુલગૃહે શિખી ।
જ્વલતિ યસ્ય સ ક્ષિતિતલે મખી ॥ ૯॥

યદિ શશી દ્રવેત્કુલશિખિત્વિષા ।
અમૃતતઃ શમં વ્રજતિ ન સ્તૃષા । ૧૦॥

ચલતમં મનઃ પ્રશમમેતિ નઃ ।
સ્મરણયુક્તયા શ્વસિતયાત્રયા ॥ ૧૧॥

નિજચિતિસ્મૃતિર્યદિ ન વિચ્યુતા ।
ભવતિ યોગિતા સુલભસાધિતા ॥ ૧૨॥

દશશતચ્છદસ્થિતમનાઃ સદા ।
અનુભવેન્મહોમહદદો મુદા ॥ ૧૩॥

ભવતિ નિષ્ઠિતો યદિ ચતુષ્પથે ।
મહસિ લીયતે ધૃતજગત્કથે । ૧૪॥

અયિ વિચિન્તય સ્વવપુરુત્તરમ્ ।
વશમિતં ભવેત્તવ મહત્તરમ્ ॥ ૧૫॥

પરમશક્તયે સ્વવપુરર્પ્યતામ્ ।
અયિ કિમદ્ભુતં ભવતિ દૃશ્યતામ્ ॥ ૧૬॥

કરણશક્તિવિત્કૃતિષુ રાજતે ।
ગમનશક્તિવિદ્ગતિષુ શોભતે ॥ ૧૭॥

શ્રવણશક્તિવિચ્છ્રુતિષુ ન સ્ખલેત્ ।
મનનશક્તિવિન્મતિષુ નો પતેત્ ॥ ૧૮॥

અતુલસિદ્ધિદાનિહ પૃથગ્વિધાન્ ।
મુનિવરોઽભ્યધાદિતિ તપઃ પથાન્ ॥ ૧૯॥

બહુલયોગિવાઙ્મથનતોઽમૃતમ્ ।
અનુભવક્ષમં તદિદમાહૃતમ્ ॥ ૨૦॥

ઇતિ શ્રીભગવન્મહર્ષિરમણાન્તેવાસિનો વાસિષ્ઠસ્ય
નરસિંહસૂનોર્ગણપતેઃ કૃતિર્ગીતમાલા સમાપ્તા ।

Songs on agni, gaNapati, indra, vAyu, sUrya,
dashAvatAra, ambikA, reNukA, guru, yogasAra
composed by Vasishtha Ganapati Muni

Proofread by Paresh Panditrao

---

*Gitamala by Vasishtha Ganapati Muni*
pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*